শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীনযিনারাচার্য ৱিরচিতম্

# ॥শ্রীমদ্বেদান্তদেশিক ৱিগ্রহধ্যানম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমদ্বেদান্তদেশিক ৱিগ্রহধ্যানম্॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমল্লক্ষ্মণ যোগীন্দ্র সিদ্ধান্ত ৱিজযধ্বজম।
ৱিশ্বামিত্র কুলোদ্ভূতং ৱরদার্যমহং ভজে॥

মনঃ প্রসূনস্তবকং মদীযং নাথস্য কৌতূহলমাতনোতু।
বিভর্তি যো ভাগৱতেষু সর্ৱতন্ত্রস্ৱতন্ত্রেষু চ পারতন্ত্র্যম্॥ ১॥

শ্রীৱাদিহংসাংবুদ দেশিকেন্দ্র পাদাংবুজ দ্বন্দ্ব পরাগদৈৱম্।
শ্রীৱেঙ্কটেশং গুরুসার্ৱভৌমং চেতশ্চিরং ভাৱয সৌম্যরূপম্॥ ২॥

শ্রীমত্ত্রযীশেখর দেশিকস্য শ্রীৱেঙ্কটেশস্য ৱপুর্মনোজ্ঞম্।
আদিত্যৱর্ণং ৱিশদং মমাক্ষ্ণোঃ আপাদচূড়াপদমাৱিরস্তু॥ ৩॥

নির্ন্দ্রিপঙ্কেরুহযুগ্মশোভা নিরাকৃতিপ্রৌঢপদাব্জযুগ্মম্।
নীরন্ধ্র নির্যন্নখচন্দ্রচন্দ্রা তপস্ফুটদ্ধ্যাতৃহৃদন্ধকারম্॥ ৪॥

নিজার্থচন্দ্রোপমিতালকোদ্যন্ নিরন্তরোদ্ভাসি সিতোর্ধ্বপুণ্ড্রম্।
সিতাযতস্বচ্ছসরোজবন্ধং মুনেঃ শঠারেরিৱ মূর্তিভেদম্॥ ৫॥

মুখেন্দ্বধঃ পাতি করোতকরাকৃতি স্ফুটচ্ছৱিশ্বমশ্রুপরিষ্কৃতোরসম্।
সিতোপৱীতং তুলসীসরোরুহ অক্ষমালিকালঙকৃতচারুকন্ধরম্॥ ৬॥

অনঙ্গ সৌৱর্ণ নিষঙ্গকান্তি প্রসঙ্গভঙ্গাৱহ চারুজঙ্ঘম্।
লসতককুদ্মতককুদাভিরূপ্য নিতান্তনির্ভাসিতজানুযুগ্মম্॥ ৭॥

রম্ভাৱরস্তম্ভ ৱিজৃম্ভমাণ দুর্গৱর্সর্ৱঙ্কষ সকথিদৃশ্যম্।
কটীতটশ্লিষ্টপৱিত্রশুভ্রান্তরীযনির্ভাসি নিতম্ববিম্বম্॥ ৮॥

আৱর্তগর্তোজ্বল নাভি চক্রং অত্যাযতোরস্থলদীপ্যমানম্।
আজানু লম্ব্যাযত ৱৃত্ত বাহুং অত্যুন্নতাংসং শ্রিতগূঢজত্রুম্॥ ৯॥

www.prapatti.com

শঙ্খপ্রতিস্পর্ধিসুজাতকণ্ঠং শান্তোপমানাযিতকর্ণপাশম্।
সুস্নিগ্ধবদ্ধস্মিতচূতপোত নৱ্যপ্রৱালোপমিতাধরোষ্ঠম্॥ ১০ ॥

সুনির্মলোদঞ্চিতমৌক্তিকালী জডীকৃতপ্রৌঢিমদন্তপঙ্ক্তিম্।
ৱিকাসিনাসাপুটকান্তিশান্ত প্রফুল্লতিল্যপ্রসৱাৱলেপম্॥ ১১ ॥

নাসালসত্ কল্পলতা প্রসূন যুগাযিতাম্ভোরুহচারুনেত্রম্।
ততসৌরভাঘ্রাণৱিনিশ্চলালি দ্বযোপমভ্রূযুগলাভিরামম্॥ ১২ ॥

সুজাত চরণাম্বুজং সুদৃঢগুলফ জানূরুকং
সিতান্তরকটীতটং সুভগনাভিৱক্ষোগলম্।
সুদীর্ঘযুগবাহুকং শুভকপোলনাসাক্ষিকং
মনোরুচিরমালিকং কলয ৱেঙ্কটেশং গুরুম্॥ ১৩ ॥

রথাঙ্গজলজাঙ্কিতঃ সুললিতোর্ধ্বপুণ্ড্রোজ্জ্বলঃ
সরোজতুলসীমণিগ্রথিতমালিকাভূষণঃ।
সিতাংশুকযুগাঞ্চিতঃ স্মিতমুখো দযাশীতলঃ
চকাস্তু হৃদি মে সদা স গুরুৱেঙ্কটাধীশ্বরঃ॥ ১৪ ॥

য ইমাং দিনচর্যাং চ ৱিগ্রহধ্যানপদ্ধতিম্।
ৱরদার্যকৃতাং ভক্ত্যা শীলযেত্ মুক্ত এৱ সঃ॥ ১৫ ॥

॥ ইতি শ্রীমদ্বেদান্তদেশিক ৱিগ্রহধ্যানম্ সমাপ্তম্ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥

www.prapatti.com